रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 8

105

405 (IOD)

Manoj 11/04/22

(मनोज कुमार पाठक)
प्रवक्ता/शोध अधिकारी

# 2022

# संस्कृतम्

समय : 3 घण्टे ] [ पूर्णांक : 100

## खण्ड – 'क' (अपठितांश-अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–
(निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए।)

एकदा शरीरस्य सर्वाणि इन्द्रियाणि - हस्तौ, पादौ, मुखं, नासिका, कर्णौ इत्यादीनि मिलित्वा अचिन्तयन् - वयं सर्वे प्रतिदिनं परिश्रमं कुर्मः। एतद् उदरं सर्वं स्वीकरोति, स्वयं किमपि कार्यं न करोति। अद्य प्रभृति वयमपि कार्यं न करिष्यामः। एवं चिन्तयित्वा सर्वाणि अंगानि कार्याणि अत्यजन् । मुखे अन्नकणः अपि न प्राविशत्। शनैः शनैः सर्वाणि अंगानि शिथिलानि अभवन्। कार्यशक्तिः अपि क्षीणा अभवत्। तदा मिलित्वा विचारम् अकुर्वन् - अहो! अस्माकं प्रमादः। भुक्तस्य अन्नस्य पाचनं तु उदरमेव करोति। अस्मभ्यं शक्तिं च ददाति। अतः वैमनस्यं विहाय सहयोगः करणीयः। तदैव शरीरः शक्तिसम्पन्नः भविष्यति। नूनं संहतिः एव कार्यसाधिका। देशस्य समृद्धयेऽपि इयमेव संहतिः आवश्यकीया।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×4=2
- (i) कानि इन्द्रियाणि सन्ति?
- (ii) उदरं किं करोति?
- (iii) कुत्र अन्नकणः अपि न प्राविशत्?
- (iv) देशस्य समृद्धये का आवश्यकीया?

(ख) संस्कृतस्य पूर्ण वाक्येन उत्तरत (संस्कृत के पूर्ण वाक्य में उत्तर दीजिए) – 1×2=2
- (i) कार्यसाधिका का भवति?
- (ii) किं विहाय सहयोगः करणीयः?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×4=4
- (i) 'शनैः शनैः सर्वाणि अंगानि शिथिलानि अभवन्' अत्र अव्ययं पदं किम्?
- (ii) 'भुक्तस्य अन्नस्य' अत्र विशेष्य पदं किम्?
- (iii) 'विहाय' अस्मिन् पदे कः प्रत्ययः?
- (iv) 'अस्मभ्यं' पदे का विभक्तिः?

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (इस गद्यांश के लिए समुचित शीर्षक लिखिये) 2



Downloaded from cclchapter.com

## खण्ड – 'ख' (संस्कृतेन रचनात्मकं कार्यम्)

2. द्वादश कक्षायाः छात्राः ऐतिहासिक स्थले भ्रमणार्थं अनुमति प्रदानाय प्रधानाचार्यं प्रार्थनापत्रं लिखन्ति। मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयित्वा प्रार्थनापत्रम् उत्तर पुस्तिकायां लिखत। ½×10=5

(कक्षा बारह के छात्र ऐतिहासिक स्थल पर भ्रमण के लिए अनुमति प्रदान करने हेतु प्रधानाचार्य को पत्र लिखते हैं। मंजूषा से उचित पद चुनकर रिक्त स्थानों की पूर्ति कर प्रार्थनापत्र उत्तरपुस्तिका में लिखिये।)

| |
|---|
| **मञ्जूषा** - अनुगृहणन्तु, सेवायाम्, अनुमतिम्, निवेद्यते, कर्तुम्, शिक्षकः, भ्रमणाय, सह, द्वादश कक्षा, विषयस्य |

(i) --------------------

प्रधानाचार्यः

डी.एन. माध्यमिक विद्यालयः

रूड़की (हरिद्वारम्)

विषयः- ऐतिहासिक स्थले भ्रमणाय प्रार्थनापत्रम् ।

महोदय !

सविनयं (ii).........यत् वयं राजनीति विज्ञान (iii) ......छात्रा स्मः। ऐतिहासिक स्थलानां (iv) ...... आगरा नगरस्य यात्रां (v)....इच्छामः । अस्माकं राजनीति विज्ञान (vi)....अपि अस्माभिः (vii).....गमिष्यति। तस्य स्वीकृतिः अपि अस्ति। सम्प्रति भवताम् (viii) ....अपेक्ष्यते।

कृपया अनुमतिं प्रदाय (ix) ..........।

भवताम् शिष्याः

(x) ..........

3. मञ्जूषायां प्रदत्त शब्दसूची साहाय्येन अधोलिखितां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत। (मञ्जूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा को पूर्ण कर उत्तरपुस्तिका में पुनः लिखिये।) ½×10=5

महाकविः भारविः (i).......... आसीत्। प्राचीनकालादेव तस्य (ii) ...... किरातार्जुनीयम् अतीव प्रसिद्धम्। भारविः महता (iii).......... विद्याम् अर्जितवान् ।तस्य विलक्षणा काव्यप्रतिभा महाकाव्ये (iv).....भवति। सः कविसम्मेलनेषु निरन्तरं काव्यं (v)..........। तस्य रम्यं काव्यं श्रुत्वा (vi)..... भ्रशं प्रशंसन्ति स्म। इत्थं तस्य (vii)..... अल्पेनैव कालेन चतुर्दिक्षु प्रासरत्।भारविः (viii).......देश विदेशेऽपि गच्छति स्म। तस्य पिता स्वपुत्रस्य काव्ययशसा (ix).......अत्यन्तं प्रसन्नः सन्तुष्टश्चासीत्। तथापि सः वचसा भारविं कदापि न प्राशंसत्। प्रत्युत सः यदा कदा तस्य पाण्डित्यस्य आलोचनाम् अकरोत् । तेन भारविः (x)......अजायत्।

| |
|---|
| **मञ्जूषा** –शास्त्रार्थम्, महाकाव्यम्, कीर्तिलता, खिन्नः, दृष्टिगोचरा, श्रोतारः, राजकविः, अश्रावयत्, मनसि, परिश्रमेण |



Downloaded from cclchapter.com

4. अधोलिखितेषु **एकं** विषयम् अधिकृत्य पञ्चवाक्यमितम् एकम् अनुच्छेदं संस्कृतभाषायां लिखत- 1×5=5

(नीचे लिखे किसी **एक** विषय पर पाँच वाक्यों का संस्कृत भाषा में एक अनुच्छेद लिखिये)–

(i) प्रभातवेला (ii) यौतुकम् (iii) युवा संचेतना

**खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)**

5. अधोलिखितेषु वाक्येषु रेखांकित पदेषु सन्धि-विच्छेदं कुरुत – 1×6=6

(निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि-विच्छेद कीजिए)

(i) स्वाध्यायान्मा प्रमदः।

(ii) प्रविष्टोऽस्मि तपोवनम्।

(iii) कर्णामृतं सूक्तिरसं विमुच्य।

(iv) वत्सराजश्च धारानगरीं सम्प्राप्य राजानं प्रणिपत्योपविष्टः।

(v) शोकादवचनात् राज्ञा हस्तेनैव विसर्जितः।

(vi) प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः।

6. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विग्रहाः लेखनीयाः – 1×6=6

(निम्नलिखित वाक्यों में रेखांकित पदों का विग्रह कीजिये)

(i) इत्युक्त्वा स महाबाहुः अनुशंस चिकीर्षया।

(ii) प्रजानामेव भूत्यर्थम् स ताभ्यो बलिमग्रहीत्।

(iii) ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा।

(iv) मुञ्जं महाबलम् आलोक्य।

(v) यानि अनवद्यानि कर्माणि।

(vi) गुणी गुणं वेत्ति न वेत्ति निर्गुणः।

7. निम्नलिखितेषु वाक्येषु कोष्ठकान्तर्गत प्रकृति-प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत - 1×8=8

(निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय जोड़कर खाली स्थान भरिये)

(i) मया ......... च या। (पुत्र+मतुप् (वतुप्) स्त्री.)

(ii) मया भोजराजः .........। (रक्ष्+क्त)

(iii) शठः सहस्रैरपि .........। (शिक्ष्+शानच्)

(iv) पुत्रं च बालं ........ विचारयामास। (सम्+वीक्ष्+ल्यप्)

(v) भोजः वत्सराजं ........। (कथ्+क्तवतु)

(vi) प्रवृतिं च ......... च जना न विदुरासुराः। (नि+वृत्+क्तिन्)

(vii) त्रिःपृष्टोऽपि प्रत्युत्तरमददत् .........। (हन्+तव्यत्)

(viii) सहस्रगुणम् ............ आदत्ते हि रसं रविः। (उत्+सृज्+तुमुन्)



Downloaded from cclchapter.com

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् – 1×5=5

(निम्नलिखित वाक्यों में कर्ता और क्रिया पदों की अन्विति कीजिये)

(i) न त्वं शोचितुम् ------- । (अर्हति / अर्हसि)

(ii) अल्पज्ञ एव ------ जल्पति। (पुरूषः / पुरूषाः)

(iii) वत्सराजः भोजं रात्रौ वनं ------- । (नीतवन्तः / नीतवान्)

(iv) अस्मद् राज्यभ्रंशो ----------- उद्योगं जनयति।(भवतः / भवताम्)

(v) त्वादृशाः एव वस्तुतः पुरस्कार भाजनानि ----------। (भवन्ति / भवति)

9. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत- 1×5=5

(नीचे लिखे वाक्यों में कोष्ठक में दिये गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके रिक्त स्थान भरिये)

(i) तानहं द्विषतः क्रूरान् -------- नराधमान्। (संसार)

(ii) राजा सौधं निर्जनं विधाय -------- प्राह। (वत्सराज)

(iii) -------- यत्नः सुमहान् खलानाम्। (दोष)

(iv) केवलं महाराज ------- आज्ञां वयं शिरसा वहामः। (शिववीर)

(v) अनया दत्तान् -------- तावद् आनय । (वल्कल)

## खण्ड - 'घ' (पठितांश अवबोधनम् भाग-I)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत –

(नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिये)

भोजविषयिणीम् इमां भविष्यवाणीं निशम्य मुञ्जोविच्छाय वदनोऽभूत्। ततो राजा ब्राह्मणं सम्प्रेष्य निशीथे शयनमासाद्य व्यचिन्तयत् यदि राजलक्ष्मीर्भोजकुमारं गमिष्यति, तदाहं जीवन्नपि मृतः। ततश्च अभुक्त एव सः एकाकी किमपि चिन्तयित्वा बंगदेशाधीश्वरं वत्सराजं समाकारितवान्। वत्सराजश्च धारानगरीं सम्प्राप्य राजानं प्रणिपत्योपविष्टः।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2=1

(i) कः ब्राह्मणं सम्प्रेष्य व्यचिन्तयत्?

(ii) कीदृशीं भविष्यवाणीं निशम्य मुञ्जो विच्छायवदनोऽभूत?

(ख) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) - 1

(i) राजा निशीथे शयनमासाद्य किं व्यचिन्तयत्?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिये) 1×3=3

(i) गद्यांशे 'रात्रि' पदस्य समानार्थी पदं किं प्रयुक्तम्?

(ii) 'निशम्य' पदे कः प्रत्ययः ?

(iii) 'सः एकाकी किमपि चिन्तयित्वा' अत्र 'सः' सर्वनामपदं कस्मै प्रयुक्तः?



Downloaded from cclchapter.com

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत –

(नीचे लिखे नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए)-

रामः – अत्र मोह मुपगतस्तत्र भवान्। हन्त! निवेदितमप्रभुत्वम्।
मैथिलि!
मङ्गलार्थेऽनयादत्तान् वल्कलांस्तावदानय।
करोम्यन्यैर्नृपैर्धर्मं नैवाप्तं नोपपादितम्।।

सीता – गृह्णात्वार्यपुत्रः।

रामः – मैथिलि! किंव्यवसितम्।

सीता – ननु सहधर्मचारिणी खल्वहम्।

रामः – मयैकाकिना किल गन्तव्यम्।

सीता – अतो नु खल्वनुगच्छामि।

रामः – वने खलु वस्तव्यम्।

सीता – तत् खलु मे प्रासादः।

रामः – श्वश्रूश्वशुरशुश्रूषापि च ते निर्वर्तयितव्या।

सीता – एनामुद्दिश्य देवतानां प्रणामः क्रियते।

रामः – लक्ष्मण! वार्यतामियम्।

लक्ष्मण – आर्य! नोत्सहे श्लाघनीयेकाले वारयितुमत्र भवतीम्।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिये) – ½×2=1

(i) कैः धर्मं नोपपादितम्?

(ii) लक्ष्मणः काम् वारयितुम् नोत्सहे?

(ख) पूर्ण वाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) – 1

(i) मङ्गलार्थेः अनया दत्तान् कान् आनय?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिये) – 1×3=3

(i) 'गृह्णात्वार्यपुत्रः' अत्र सन्धि विच्छेदं कुरुत?

(ii) नाटयांशात् 'तव्यत्' प्रत्ययान्त पदं चिनुत?

(iii) 'सहधर्मचारिणी खल्वहम्' अत्र कर्तृपदं किम्?

12. अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत –

(नीचे लिखे पद्यांश को पढ़कर प्रश्नों के उत्तर दीजिये)-

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः।
द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता।।



Downloaded from cclchapter.com

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिये) – ½×2=1

(i) कः तासां पिता आसीत्?

(ii) कीदृशी अङ्गुलिः त्याज्या भवति?

(ख) पूर्ण वाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिये) – 1

(i) दिलीपस्य कृते द्वेष्योऽपि कमिव सम्मतः आसीत्?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिये) – 1×3=3

(i) 'अङ्गुलीव' अत्र सन्धिविच्छेदं कुरुत?

(ii) 'दुष्टः प्रियोऽपि त्याज्यः' अत्र विशेषणपदं किम्?

(iii) 'स पिता पितरस्तासाम्' अत्र 'स' कर्तृपदं कस्मै प्रयुक्तम्?

13. निर्देशानुसारं प्रश्नान् उत्तरत –

(निर्देशानुसार प्रश्नों के उत्तर दीजिए)-

(क) "मातृदेवो भव पितृदेवो भव। आचार्य देवो भव। यानि अनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि।" 1+1=2

(i) उपर्युक्त पङ्क्तयः पाठयपुस्तकस्य कस्मात् पाठात् उद्धृताः?

(ii) एताः पङ्क्तयः मूलरूपेण कस्मात् ग्रन्थात् संकलिताः?

(ख) 'भगवन्! संन्यासी तुरीयाश्रमसेवीति प्रणम्यते।' 1+1=2

(i) एषा पङ्क्तिः मूलरूपेण कस्मात् ग्रन्थात् उद्धृतः, अस्य लेखकश्च कः?

14. अधोप्रदत्त भावार्थत्रये शुद्ध भावार्थस्य चयनं कृत्वा लिखत- 2+2=4

(नीचे दिये गये क, ख खण्डों में, प्रत्येक के तीन भावार्थों में से शुद्ध भावार्थ का चयन कर लिखिये)-

(क) 'नैकेनापि समं गता वसुमती नूनं त्वया यास्यति'

(i) इयं धरित्री त्वया सह यास्यति।

(ii) इयं धरित्री केनापिसह न गता, त्वया सह अवश्यमेव यास्यति।

(iii) इयं धरित्री त्वया सह न यास्यति।

(ख) त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।

(i) आत्मनः नाशाय त्रिविधं नरकस्य द्वाराणि भवन्ति।

(ii) नरकस्य त्रिविधं द्वाराणि भवन्ति।

(iii) नरकस्य द्वाराणि के भवन्ति?

**अथवा**

अधोदत्त श्लोकस्य प्रदत्तं भावार्थं मञ्जूषा प्रदत्तपदैः पूरयित्वा लिखत – ½×8=4

(नीचे दिये गये श्लोक के भावार्थ को मञ्जूषा में दिये गये पदों से पूर्ण करके लिखिये।)

अल्पज्ञ एव पुरूषः प्रलपत्यजस्रं



Downloaded from cclchapter.com

पाण्डित्य सम्भृतमतिस्तु मितप्रभाषी।

कांस्यं यथा हि कुरुतेऽतितरां निनादं

तद्वत् सुवर्णमिह नैव करोति नादम्।।

**भावार्थः** – अल्पज्ञानी (i) ......... निरन्तरं (ii) .........। बुद्धिमान् मनुष्यः (iii) ......... भवति। यथा (iv) ......... अत्यधिकं (v) .......... करोति (vi) .........सुवर्णं (vii) ......... न (viii) ......... ।

| **मञ्जूषा** - जल्पति, मितभाषी, ध्वनिं, कांस्यं, तथा, करोति, नादम्, पुरुषः |
|---|

15. अधोलिखित श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत –
(नीचे दो श्लोकों का अन्वय दिया गया है। उनमें रिक्त स्थानों की पूर्ति करके अन्वय पुनः लिखिये)।

(क) मान्धाता च महीपतिः कृतयुगालङ्कार भूतो गतः।
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।
अन्ये वापि युधिष्ठिर प्रभृतयो याता दिवं भूपते।
नैकेनापि समं गता वसुमती नूनं त्वया यास्यति।। ½×4=2

**अन्वयः** - कृतयुगालङ्कारभूतः (i) .......... गतः। येन महोदधौ सेतुः विरचितः (ii) ........... दशास्यान्तकः क्व? भूपते! अन्ये वापि (iii)..........दिवं याता। एकेनापि समं वसुमती न (iv) ................. नूनं त्वया यास्यति।

(ख) तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति संपदं दैवीमभिजातस्य भारत।। ½×4=2

**अन्वयः** - (i) ........... तेजः क्षमा धृतिः (ii) ...........अद्रोहःनातिमानिता (iii)........... दैवीम् (iv)............ भवन्ति।

16. अधोलिखितानां 'अ' स्तम्भस्य वाक्यांशानां 'ब' स्तम्भस्य वाक्यांशैः सह उचित मेलनं कुरुत– 1×4=4
(निम्नलिखित 'अ' स्तम्भ में प्रदत्त वाक्यांशों का 'ब' स्तम्भ में दिए गये वाक्यांशों के साथ उचित मिलान कीजिये)

| स्तम्भ 'अ' | स्तम्भ 'ब' |
|---|---|
| (क) एकेनापि सुपुत्रेण | (i) वाच्यं नरपतौ त्वया |
| (ख) वत्सराजस्य इदं | (ii) त्यागे श्लाघा विपर्ययः |
| (ग) अपिनैर्गुण्यम्स्माकं | (iii) विद्यायुक्तेन साधुना |
| (घ) ज्ञाने मौनं क्षमा शक्तौ | (iv) वचनम् आकर्ण्य |

17. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत- 1×4=4
(अधोलिखित वाक्यों में रेखांकित शब्दों के प्रसङ्गानुसार उचित अर्थ कोष्ठक से चुनकर लिखिये।)

(क) तद् <u>अन्वये</u> शुद्धिमति प्रसूतः। (वंशे/राज्ये)



Downloaded from cclchapter.com

(ख) जनीभवति भूयिष्ठं स्वजनोऽपि विपर्यये। (अनुकूले/प्रतिकूले)

(ग) तानि त्वयोपास्यानि नो इतराणि। (अन्यानि/स्वीयानि)

(घ) दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्। (कुटिलताम्/सरलाताम्)

## खण्ड - 'घ' (संस्कृत साहित्य-परिचयः भाग-II)

18. अधोलिखितानां कवीनां देशकालकृतीनां यथानिर्देशं नामानि लिखत –

(निम्नांकित कवियों के देश, समय और रचनाओं के नाम निर्देशानुसार लिखिये) –

(क) कवयः 1×3=3

(i) अम्बिकादत्त व्यासः
(ii) भर्तृहरिः
(iii) अश्वघोषः
} देशः

(ख) कवयः 1×3=3

(i) बल्लालसेनः
(ii) भासः
(iii) नारायणपण्डित
} कालः

(ग) कवयः 1×4=4

(i) कालिदासः
(ii) बिल्हणः
(iii) विष्णुशर्मा
(iv) व्यासः
} काऽपि एका रचना

अथवा

(क) निम्नप्रदत्तवाक्येषु कोष्ठकेभ्यः चित्वा उचित शब्दैः रिक्तस्थानपूर्तिः क्रियताम्। 1×5=5

(नीचे दिये गये वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्त स्थान की पूर्ति कीजिये।)

(i) नीतिशतकस्य रचयिता ------- अस्ति। (भासः / भर्तृहरिः / व्यासः)

(ii) भोजप्रबन्धस्य रचनाकारः -------- अस्ति। (बल्लालसेनः / कालिदासः / अश्वघोषः)

(iii) शिवराजविजयस्य रचनाकारः --------अस्ति। (बिल्हणः / अश्वघोषः / अम्बिकादत्तव्यासः)

(iv) श्रीमद्भगद्गीता ग्रन्थस्य रचयिता ----- आस्ति। (व्यासः / कालिदासः / विष्णुशर्मा)

(v) पञ्चतन्त्रम् ------ ग्रन्थम् अस्ति। (कथासाहित्यस्य / नाटकस्य / काव्यसाहित्यस्य)

(ख) नाटक साहित्यस्य पञ्च विशेषताः लिखत। 5

(नाटक साहित्य की पाँच विशेषतायें लिखिये)

*****



Downloaded from cclchapter.com